শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধেঃ কৃতিষু

# ॥ শ্রীমালোলস্তৱঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমালোলস্তৱঃ ॥

কৱিতাজিতকল্লোলিকন্যকাকান্তৱক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ ॥

মাযা ধৱ ! শ্রীনৃহরে নমস্তে !
    কাযাধৱার্থং কলিতাৱতার !।
মাযাপরং মামপি রক্ষিতুং ৎৱং
    কাযান্তরাভাহি তমো ৱিভিন্দন্॥ 1 ॥

মালোলমাহুর্ভগৱন্ ! ভৱন্তং
    সন্তো মহান্তো নিগমান্তনিষ্ঠাঃ।
তথৈকলং চাহুরহো ! ৱিচিত্রং
    মিথো ৱিরোধান্মতিরেতি মোহম্॥ 2 ॥

ৎৱাং তত্ত্বতো ৱেত্তুমহং ন চালং
    মামেকলং তেন ৱিভাৱযামি।
মালোললোলং চ ৱিভাৱ্য নাথ !
    দযানিধে ! মোহমহং ত্যজামি॥ 3 ॥

হিরণ্যৱর্ণাং হরিণীং ৱহন্তং
    গজং ভজন্তং পরিপালযন্তম্।
মালোলসিংহং পরমাদ্ভুতং ৎৱাং
    আগস্ৱিনামগ্রগতঃ প্রপদ্যে॥ 4 ॥

হিরণ্যমূর্তিং তপনান্তরঙ্গে
    হিরণ্যশৃঙ্গং ৱরুণাত্মতাযাম্।

হিরণ্যৱর্ণাং হরিণীং ৱহন্তং
    হিরণ্যদানং ভগৱন্তমীডে॥ **5**॥

প্রহ্লাদৱন্নতজনং পরিপালযন্তং
    তত্তাতৱন্নতজনাঘমপোহযন্তম্।
প্রহ্লাদদং নতজনায হিরণ্যদং চ
    মালোলমানৱমৃগেন্দ্রমহং প্রপদ্যে॥ **6**॥

স্থূণাধিকানামপি মাদৃশানাম্
    অন্তর্নিৱাসায স এৱ যোগ্যাম্।
স্থূণান্তরাসাদ্য চকার তস্মৈ
    মালোলসিংহায নমো নমোঽস্তু॥ **7**॥

হিরণ্যৱক্ষো ন রুষা ৱ্যদারীৎ
    দযানিধির্ৱৎসল এষ নাথঃ।
নখৈশ্চিকিৎসাং পুনরাততান
    দোষান্ তদন্তর্ৱহতো নিরস্যন্॥ **8**॥

এৱং ত্রিরেৱ প্রভুরস্য কৃৎৱা
    ৱৈদ্যশ্চিকিৎসাং শিশুপালতাযাম্।
দোষানপোহ্য ক্ষমযা দদৌ তৎ
    স্ৱানন্দমস্মৈ তমমুং প্রপদ্যে॥ **9**॥

মালোলসিংহায নমো নমস্তে
    মালোলমেনং ৱিষযেষ্ৱজস্রম্।
আলোলমাহেতি কুটুম্বকার্যে
    মালোলমালোকত আতনুষ্ৱ॥ **10**॥

মালোলেতি ত্র্যক্ষরী যস্য কণ্ঠে
    মালোলা স্যাৎ সুস্থিরা তস্য গেহে।
মালা লোলা সৎকলানাং চ তস্মিন্
    বালালাপা লালনীযাঃ কলাশ্চ ॥ **11** ॥

শ্রীৱাসরাঘৱকৱীন্দ্রপযোধিজাতং
    মালোলৱিষ্ণুপদদেৱনদর্শনীযম্।
এতং নিষেৱ্য সমযে স্তৱরাজচন্দ্রং
    সংসারতাপমখিলং শমযন্তু সন্তঃ ॥ **12** ॥

॥ ইতি শ্রীমালোলস্তৱঃ সমাপ্তঃ ॥